# भगवति भारति देवि नमस्ते



वीणावादिनि! बुद्धिविकासिनि
पुस्तकधारिणि! सुमधुरहासिनि ।
सुमतिप्रदायिनि! आत्मविलासिनि
चित्ते वस नः हृदयविभासिनि ॥

वस अस्माकं मृदुमधुवचने
लस जिह्वाग्रे मानसभवने ।
वस मातर्नः सरले हृदये
निर्मलचरिते एहि नु सदये ॥

वीणा-पुस्तक-मण्डित-हस्ते
भगवति भारति देवि नमस्ते ।
विद्यां बुद्धिं देहि प्रणताः
चरणे स्मः बालाः नतमस्ताः ॥